# શ્રીરૂપચિન્તામણિઃ

## Shri Rupachintamanih

sanskritdocuments.org

March 16, 2019

# Shri Rupachintamanih

# શ્રીરૂપચિન્તામણિઃ

## Sanskrit Document Information

Text title : rUpachintAmaNiH

File name : rUpachintAmaNiH.itx

Category : deities_misc, gurudeva, vishvanAthachakravartin, stavAmRRitalaharI

Location : doc_deities_misc

Author : Vishwanatha Chakravarti

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Proofread by : Jan Brzezinski, Neal Delmonico

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : March 16, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 16, 2019

*sanskritdocuments.org*

# શ્રીરૂપચિન્તામણિઃ

છત્રં શક્તિયવાઙ્કુશં પવિચતુર્જમ્બૂફલં કુણ્ડલં
  વેદીદણ્ડગદારથામ્બુજચતુઃસ્વસ્તિં ચ કોણાષ્ટકમ્ ।
શુદ્ધં પર્વતમૂર્ધ્વરેખામલોઽઙ્ગષ્ઠાત્કનિષ્ઠાવધે-
  ર્બિભ્રદ્દક્ષિણપાદપદ્મમમલં શચ્યાત્મજશ્રીહરેઃ ॥ ૧॥

શઙ્ખાકાશકમણ્ડલું ધ્વજલતાપુષ્પસ્રગર્ધેન્દુકં
  ચક્રં નિર્જર્યધનુસ્ત્રિકોણવલયાપુષ્પં ચતુસ્કુમ્ભકમ્ ।
મીનં ગોષ્પદકૂર્મમાસુહૃદયાઙુષ્ઠાત્કનિષ્ઠાવધે-
  ર્બિભ્રદ્સવ્યપદામ્બુજં ભગવતો વિશ્વમ્ભરસ્ય સ્મર ॥ ૨॥

યવમઙ્ગુષ્ઠમૂલે ચ તત્તલે ચાતપત્રકમ્ ।
અઙ્ગુષ્ઠતર્જનીસન્ધિભાગસ્થામૂર્ધ્વરેખિકામ્ ॥ ૩॥

સુકુઞ્જિકાં સૂક્ષ્મરૂપાં સ્મર રે મે મનઃ સદા ।
તર્જન્યાસ્તુ તલે દણ્ડં વારિજં મધ્યમાતલે ॥ ૪॥

તત્તલે પર્વતાકારં તત્તલે ચ રથં સ્મર ।
રથસ્ય દક્ષિણે પાર્શ્વે ગદાં વામે ચ શક્તિકામ્ ॥ ૫॥

કનિષ્ઠાયાસ્તલેઽઙ્કુશં તત્તલે કુલિશં સ્મર ।
વેદિકાં તત્તલે વ્યાપ્તાં તત્તલે કુણ્ડલં તતઃ ॥ ૬॥

એષાં ચિહ્નતલે દીપ્તં સ્વસ્તિકાનાં ચતુષ્ટયમ્ ।
અષ્ટકોણસમાયુક્તં સન્ધૌ જમ્બૂચતુષ્ટયમ્ ॥ ૭॥

અસવ્યાઙ્ઘ્રૌ મહાલક્ષ્મ સ્મર ગૌરહરેર્મનઃ ।
અથ વામપદાઙ્ગુષ્ઠમૂલે શઙ્ખં તલે પવિમ્ ॥ ૮॥

મધ્યમાતલયાકાશં તદ્દ્વયાધો ધનુઃ સ્મર ।
ગુણેન રહિતં ચાપં વલયાં મણિમૂલકે ॥ ૯॥

કનિષ્ઠાયાસ્તલે ચૈકં સુશોભનકમણ્ડલુમ્ ।
તસ્ય તલે ગોષ્પદાખ્યં સત્પતાકાં ધ્વજાં પુનઃ ॥ ૧૦॥

ચિન્તય તત્તલે પુષ્પં વલ્લીં તસ્ય તલે સ્મર ।
ગોષ્પદસ્ય તલેઽપ્યેકં ત્રિકોણાકૃતિમણ્ડલમ્ ॥ ૧૧॥

ચિન્તય તત્તલે કુમ્ભાન્ ચતુરઃ સમનોરમાન્ ।
તેષાં મધ્યે ચાર્ધચન્દ્રં તલે કૂર્મં સુશોભનમ્ ॥ ૧૨॥

શફરીં તત્તલે રમ્યાં તસ્યાપિ દક્ષિણે પુનઃ ।
કૂર્મસ્ય તુલ્યભાગે તુ નિમ્ને ઘટતલેઽપિ ચ ॥ ૧૩॥

મનોરમાં પુષ્પમાલાં સ્મર વામાઙ્ઘ્રિપઙ્કજે ।
ઇતિ દ્વાત્રિંશચ્ચિહ્નાનિ ગૌરાઙ્ગસ્ય પદાબ્જયોઃ ॥ ૧૪॥

ઇતિ શ્રીવિશ્વનાથચક્રવર્તિઠક્કુરવિરચિતસ્તવામૃતલહર્યાં
શ્રીરૂપચિન્તામણિઃ સમ્પૂર્ણા ।

*Shri Rupachintamanih*
pdf was typeset on March 16, 2019

Please send corrections to *sanskrit@cheerful.com*